# संस्कृत-वार्ता:

**दिनाङ्क:-14.05.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी अद्य वाराणसी-लोकसभा-क्षेत्राय स्वीय-नैर्वाचनिक-नामांकन-पत्रं पूरितवान्।
- लोकसभा-निर्वाचनस्य सप्तमान्तिमचरणाय नैर्वाचनिक-नामांकनपत्र-पूरणस्य अद्य अन्तिमं दिनं वर्तते।
- लिबरेशन टाइगर्स ऑफ तमिल ईलम इत्यस्मिन् संघटनस्योपरि प्रतिबन्ध: पञ्चवर्षेभ्य: प्रवर्धित:।
- पाकाधिकृत-कश्मीरे पाकिस्तान-बलै: सह प्रवर्तितस्य हिंसक प्रहारस्य अनन्तरं चत्वार: जना: मारिता:, शताधिकं च व्रणिता: जाता:।
- आई.पी.एल्. इत्येतस्यां क्रिकेट-मालिकायां नवदिल्ल्या: अरूणजेटलीति प्रख्याते क्रीडाङ्गणे अद्य डेल्हीकैपिटल्स-लखनऊ सुपर जायन्ट्स दलयोर्मध्ये द्वन्द्वं भविष्यति।

**प्रधानमन्त्री-वाराणसी**

प्रधानमन्त्री भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी अद्य वाराणसी-लोकसभा-क्षेत्राय स्वीय-नैर्वाचनिक-नामांकन-पत्रं पूरितवान्। जूनमासस्य प्रथमे दिनांके सामान्यनिर्वाचनस्य सप्तमचरणस्य अन्तिमचरणस्य च अन्तर्गतं वाराणसी-नगरे मतदानं समनुष्ठीयते। अद्य प्रात: श्रीमोदी, पवित्रगंगानद्यां स्नात्वा तस्या: तीरस्थे दशाश्वमेध-घट्टे समर्चनां कृतवान्। काशीनगरस्य आरक्षकात् कालभैरवात् च विजयाशीषं संगृह्य नामाङ्कनस्य औपचारिकतां प्रपूरयत। अस्यां प्रक्रियायाम् एन.डी.ए. संयुतिदलस्य अनेके नेतार: यथा-चन्द्रबाबूनायडू: एकनाथशिन्दे: जीतनराममांझी, सञ्जयनिषाद: रामदास-अठावले, भाजपादलाध्यक्ष: जेपीनड्डा: राजनाथसिंह:, हरदीपसिंहपुरी च उपस्थिता: आसन्। इण्डी-संयुत्या: कांग्रेसदलस्य च प्रत्याशीभूत: अजयराय: अस्मात् वाराणसी-लोकसभा-क्षेत्रात् विपक्षे संघर्षाय विराजमानो वर्तते।

**नामांङ्कनं**

लोकसभा-निर्वाचनस्य सप्तान्तिमचरणाय नैर्वाचिक-नामांकनपत्र-पूरणस्य अद्य अन्तिमं दिनं वर्तते। एतस्मिन् चरणे सप्तराज्यानां एकस्य च केन्द्रशासित-प्रदेशस्य सप्त, पञ्चाशदासनेभ्य: मतदानं करिष्यते। उत्तरप्रदेश-पञ्जाबयो: त्रयोदश, पश्चिमबङ्गस्य नव, बिहारस्य अष्ट, ओडिशाया: षड्, हिमाचलप्रदेशस्य चत्वारि, झारखण्डस्य त्रीणि, केन्द्रशासितप्रदेशस्य चण्डीगढस्य एकं च आसनेभ्य: मतदानं विधास्यते। प्रदत्तनामांकन पत्राणाम् अनुसन्धेयकार्यं श्वो भविष्यति। तत्रैव शुक्रवासरं यावत् नामांकनप्रत्यावर्तनं कर्तुं शक्यते अस्मै चरणाय मतदानम् अग्रिमासस्य प्रथमे दिवसे निर्धारितं विद्यते।

**केन्द्र-लिट्टे-प्रतिबन्ध:**

केन्द्रप्रशासनेन लिबरेशन ऑफ तमिल टाइगर्स-इलम् (एल.टी.टी.ई.) इत्यस्मिन् प्रतिबन्ध: पञ्चवर्षेभ्य: प्रवर्धित:। गृहमन्त्रालयेन स्वकीयायाम् अधिसूचनायाम् उक्तमस्ति यत् केन्द्रप्रशासनेन लिट्टे इत्यस्मिन् - संघटनस्योपरि तस्य गतिविधीनाम् अनुशीलन- पूर्वकं प्रतिबन्धः प्रवर्धितोऽस्ति। यद्धि भारतस्य संप्रभुतायै क्षेत्रीय-अखंडतायै च संकटास्पदं भवन्नस्ति। मन्त्रालयेन प्रतिबन्धकारणेषु लिट्टे इत्यस्य संघटनस्य विघटनकारिणः पृथकतावादिनश्च गतिविधयः सन्तीत्युक्तम्।

**निर्वाचनायोग:**

निर्वाचनायोगेन निगदितं यत् आदर्श-आचार-संहिताया: प्रख्यापनात् अनन्तरम् आयोगेन नवतिप्रतिशताधिका: परिवेदना: निस्सारिता: सन्ति। आयोगेन उक्तं यत् कांग्रेस-भाजपेति दले-अतिरिच्य कापि विशिष्टा प्रतिवेदना नावशिष्टास्तीति। आयोगेन अद्य एकस्मिन् वक्तव्ये प्रोक्तं यत् विभिन्नराजनीतिकदलै: प्रत्याशिभिश्च सपाद-चतुश्शत: प्रमुख-प्रतिवेदना: पञ्जीकृता: आसन्, येषु चतुश्शतप्रतिवेदनानाम् उपरि कार्याचरणं विधाय

प्रकरणानि निस्सारितानि सन्ति। आयोगन प्रोक्तं यत् कांग्रेसदलेन सप्तत्युत्तरैकशतं प्रतिवेदना: स्थापिता:, भाजपेति दलेन च पञ्चनवत्य:, अन्यदलैश्च षष्टुत्तरैकशतं प्रतिवेदना: पञ्जीकृता: आसन्।

**रामचरित-पञ्चतन्त्रश्य**

रामचरितमानस, पञ्चतन्त्रम् सहृदयलोक-लोकन इत्येतानि पुस्तकानि यूनेस्को इत्यस्य विश्व-एशिया-प्रशान्त-क्षेत्रीय-अनुस्मरण-पञ्जिकायां सम्मिलितानि सन्ति। संस्कृतिमन्त्रालयेन प्रोक्तमस्ति यत् समावेशनमिदं भारताय गौरवास्पदं वर्तते। येन राष्ट्रस्य समृद्धसाहित्यिक-सांस्कृतिकन्यासस्य च प्रतिपुष्टि: भविष्यति।

**उत्तरप्रदेश - प्रचाराभियान**

केन्द्रीय विविध-राजनीतिक-दलीय-नेतृभिः अद्य उत्तरप्रदेशे निर्वाचनसम्बद्धं प्रचाराभियानं विहितम्। भाजपेतिदलाध्यक्ष जे.पी. नड्डाः अद्य मन्त्रिणः स्मृति-ईरान्याः समर्थने उत्तरप्रदेशस्य अमेठीजनपद स्थिते मुंशीगंज इत्यत्र नैर्वाचनिक- जनसमूहं सम्बोधितवान्। तत्रैव विपक्षदलात् अस्मात् क्षेत्रात् कांग्रेसदलप्रत्याशी किशोरी लालशर्मास्ति ।

**कांस-चलचित्रोत्सव:**

अद्य फ्रांसदेशस्य कांसनगरे सप्तसप्ततितमस्य कांसचलचित्रोत्सवस्य आयोजनं समारब्धम्। द्वादश-दिवसात्मकेऽस्मिन् आयोजने भारतमपि प्रातिभाग्यं विदधाति। भारतीय-प्रतिनिधि-मण्डले भारत-प्रशासनम्, राज्यप्रशासनानि, चलचित्रजगत: सदस्याश्च सम्मिलिता: सन्ति भारतं प्रथमवारम् अवसरेऽस्मिन् भारतपर्वण: आतिथ्यं विधास्यति। कान्से भारतमण्डपम् भारतीय-चलचित्र-समुदायाय विभिन्नेषु गतिविधिषु सहभागितायै समेकित-मञ्चत्वेन कार्यं विधास्यति।

**पाकाधिकृत-हिंसा**

पाकाधिकृत-कश्मीरे पाकिस्तान-बलै: सह प्रवर्तितस्य हिंसकप्रहारस्य अनन्तरं चत्वार: जना: मारिता:, शताधिकं च व्रणिता: जाता:। अधिकारिभि: प्राप्तसूचनानुसारं न्यूनातिन्यूनं जनद्वयं भुशुण्डिका प्रहारेण मृत्युम् अधिगतवान्। तत्रैव मृतेषु चतुर्षु जनेषु एक: आरक्षि-अधिकारी अपि आसीत्। ऋणमुक्त-विद्युते गोधूमचर्णस्य च धनरूपोपकारस्य अभ्यर्थनं गृहीत्वा सहस्राधिका: जना: शुक्रवासरादेव मार्गेषु प्रदर्शनरता: सन्ति।

**केन्या-जलाप्लाव:**

भारतेन केन्या देशे जलाप्लावनपीडितेभ्य: सहायतायै भारतीय-वायुसेनाया: विशेष विमानेन चत्वारिंशत्-टनपरिमाणे औषधय: चिकित्सा-आपूर्त्योपकरणानां मानवीयसहायताया: द्वितीयोभाग: प्रेषित:। सहायताया: प्रथम: भाग: नौसेनाया: जलपोतेन सुमेधया अस्य मासस्य दशमे दिनाङ्के प्रेषित: आसीत्। केन्यायां मूसलाधारवर्षया भूयोऽपि सार्धद्विशतम् जना: मृता:, प्राय: द्विशतं जनाश्च व्रणिता: सन्ति। प्रायश: त्रिलक्षजनाश्च विस्थापिता: सन्ति जाता:।

**इटली-ओपन टेनिसप्रतिस्पर्धा**

टेनिसप्रतिस्पर्धायां, भारतस्य रोहनबोपन्ना: तस्य च ऑस्ट्रेलिलयादेशीय: सहयोगी मैथ्यूएब्डेन: अद्य इटली देशस्य रोम नगरे प्रचल्यमाणाया: इटालियन-ओपन-टेनिस प्रतिस्पर्धाया: बहिर्गतवन्तौ।

**□ई.पी.एल्.**

आई.पी.एल्. इत्येतस्यां क्रिकेट-मालिकायां नवदिल्ल्या: अरूणजेटलीति प्रख्याते क्रीडाङ्गणे अद्य डेल्हीकैपिटल्स-लखनऊ सुपर जायन्ट्स दलयोर्मध्ये द्वन्द्वं भविष्यति। विगतरात्रौ अहमदाबादनगरस्य नरेन्द्रमोदीक्रीडांगणे कोलकाता-नाइट-राइडर्सदलं निर्णायक-द्वन्द्व-चक्रेभ्य: चितम्। कोलकाता-नाइट-राइडर्स-गुजरातटायटन्य दले एकमेकम् अङ्कं स्वीकृत्य प्रतिस्पर्धाया: शीर्षस्थानकाय कोलकातानाइटराइडर्स दलमेव स्थानं सुनिश्चितवत्।

**॥ इति वार्ता: ॥**